श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्री सम्पत्तैय्यन्गार् विरचितं

# ॥ श्री लक्ष्मीपञ्चकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री लक्ष्मीपञ्चकम् ॥

श्रीचापल्यमहो नु किं जनिजुषां नूनं कथं भावये
मूढो दुष्कृतिसाहसी परधनप्रेप्सुः कदर्यो धनी।
रागोद्रोधकनाट्यकेलिचतुर स्त्रीपुञ्जनश्चेश्वरः
विद्वान्साधुरनाविलात्मतनुभृद्दैवाद्धतस्तप्यते ॥ 1 ॥

कामं सन्तु कलाभिमानवनिता यूनां जनानां प्रियाः
निर्लज्जप्रकट प्रदर्शनकलाकालुष्यमातन्वती।
विद्या हि प्रभवत्यमङ्गलमनोभावं जनित्रीमलम्
धर्मप्राशनवेश्यवश्य जनता नाशाय संप्रेरिता ॥ 2 ॥

ऐश्वर्यं न कदापि सद्गतिपथक्रान्ति प्रवाहप्लुतान्
राज्याङ्गावहबद्धकङ्कणधियो धर्मोपदेशेन तान्।
संक्षुब्धान्नयति प्रतापपवनप्रारब्धनिर्मूलने
किं वा तस्य हृदाशयो भगवतो लक्ष्मीपतित्वे रतिः ॥ 3 ॥

सामान्येन जनः श्रियं धनसुखप्राप्तेः परां देवतां
सम्भाव्यैवमुदात्तभावविधुरः पूजां विधत्ते दिनम्।
रक्षित्री भवबन्धनात् बुधजनप्राप्तेः प्रकर्षोद्वहा
मोक्षाध्वप्रचयप्रकाशमनसां नित्यं परं दैवतम् ॥ 4 ॥

मातः श्रीर्हृदि मे सदा निवस ते कारुण्यमाबिभ्रती
देहि ज्ञानममोघमञ्जलिजुषः किं वा परं प्रार्थये।

को वा ज्ञानमवाप्य चौपनिषदं सौख्यं तटित्सन्निभम्
त्वत्तः प्रार्थ्य विनिष्कृतिं स लभते ध्येयं सुदुर्मेधसां ॥ 5 ॥

॥ श्री लक्ष्मीपञ्चकं समाप्तम् ॥